# श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालयः

(केन्द्रीय विश्वविद्यालयः)

ख-4, कुतब संस्थागत क्षेत्र नव दिल्ली - ११००१६

F No. 1(61)/LBSNSU/Estt.-NT/2023-24/Part-II/ 01 Dated:- 10.06.2024

## विज्ञप्तिः

भारत-सर्वकारस्य शिक्षा-मन्त्रालयान्तर्गतस्य उच्च-शिक्षा-विभागस्य भाषाविभागेन प.सं. 8-46/2021-LII इति आदेशस्य द्वारा राष्ट्रियशिक्षानीति - २०२० इत्यत्र उल्लिखितानां परिकल्पनानां क्रियान्वयनाय भारतीय-भाषाणां संवर्धनाय, तासां सामग्रविकासाय बहुविषयकविकासाय च भारतीय-भाषा-समितिः इत्याख्या काचित् समितिः संस्थापिता।

भारतीयभाषासमितिः सम्प्रति अनुवादकार्यस्य निमित्तं अधोलिखित-विवरणानुसारं संस्कृतज्ञान् अनुवादकान् नियोजयितुम् इच्छति -

| *पदनाम* | *पारिश्रमिकम् (प्रतिमासम्)* | *अर्हता* |
|---|---|---|
| अनुवादकः (२२)<br>१. असमियाभाषा<br>२. बङ्गभाषा<br>३. बोडोभाषा<br>४. डोगरीभाषा<br>५. गुजरातीभाषा<br>६. हिन्दीभाषा<br>७. कन्नडभाषा<br>८. कश्मिरीभाषा<br>९. कोङ्कणीभाषा<br>१०. मैथिलीभाषा<br>११. मलेयालभाषा<br>१२. मणिपुरीभाषा<br>१३. मराठीभाषा<br>१४. नेपालीभाषा<br>१५. ओडियाभाषा<br>१६. पञ्जाबीभाषा<br>१७. संस्कृतभाषा<br>१८. सन्थालीभाषा<br>१९. सिन्धीभाषा<br>२०. तमिलभाषा<br>२१. तेलुगुभाषा<br>२२. उर्दूभाषा | ₹ ५०,०००/-<br>(साकल्येन) | आवश्यकम् -<br>क. यस्मात् कस्मादपि मान्यताप्राप्तविश्वविद्यालयात् संस्कृते न्यूनतमरूपेण ५५% अङ्कान् प्राप्य आचार्य/एम्.ए. इति उपाधिः अथवा तत्तुल्या उपाधिः लब्धा स्यात्।<br>ख. द्वयोः वा ततोऽधिकासु वा भारतीयभाषासु प्रावीण्यम् (तत्र अवश्यमेव संस्कृतम् अन्यतमं भवेत्)<br>ग. आङ्गलभाषातः संस्कृतभाषया अन्यभारतीयभाषाभिः च अनुवाददक्षता, एवमेव संस्कृतभाषातः अन्यभारतीयभाषाभ्यश्च आङ्गलभाषया उत्तमा अनुवाददक्षता<br>घ. संगणकविषयकं ज्ञानम्, टङ्कणे क्षमता, ICT-दक्षता अपि अपेक्षिता<br><br>अपेक्षितम् -<br>क. मान्यताप्राप्ते संघठने संस्थाने वा अनुवादकरूपेण अनुसन्धानकर्तृरूपेण वा कार्यानुभवः<br>ख. संस्कृतभाषया मातृभाषया च सम्भाषणे लेखने च उत्तमा भाषाव्यवहारपटुता<br>ग. नैकासु भारतीयभाषासु दक्षता<br>घ. वयः ४५-वर्षेभ्यः न्यूनम् स्यात् (अत्र भारत-सर्वकारस्य नियमानुसारं शैथिल्यं भवितुम् अर्हति) |

<u>नियुक्तिनिमित्तं नियमाः</u> -

- नियुक्तेः कालावधिः - इयं नियुक्तिः पूर्णतया अस्थायिरूपेण भवेत्, तथा च भारतीय-भाषा-समितेः कार्यप्रयोजनानुकूलं किञ्च अनुवादकानां कार्यदक्षतानुसारं भविष्यति।
- पारिश्रमिकम् - उपरि सूचितस्य अनुसारं निर्दिष्टः एव पारिश्रमिकः दीयते। नियुक्तेः कालावधिं यावत् पारिश्रमिकराशिः नियता स्यात्। किञ्च, तत्र नियुक्तिकालं यावत् वार्षिकवृद्धिः अपि न भवेत्।

- अवकाशनियमः - प्रत्येकं सम्पूरितमासम् उपलक्ष्य एकदिनस्य कृते सवेतनम् अवकाशः अनुमोद्यते।
- नियुक्तिस्थलम् -
  - समितेः निर्देशानुसारं सर्वेऽपि अनुवादकाः पूर्णकालिकरूपेण नियोजयिष्यन्ते।
  - कार्यस्थानम् - भारतीयभाषासमितेः कार्यालयः।
  - विश्वविद्यालयस्य स्थायिकर्मचारिणः इव अनुवादकाः अन्यविधलाभान् न प्राप्स्यन्ति। अपि च, एतन्नियुक्त्यनुसारं ते स्थायितामर्यादां वरिष्ठतामर्यादां च न प्राप्स्यन्ति।
  - भारतीय-भाषा-समितिः नियुक्तिकालावधेः मध्येऽपि यदा कदापि नियुक्तेः निरन्तरतां समापयितुं शक्नुयात्। भारतीय-भाषा-समितेः अध्यक्षेण समये समये प्रदत्तं कार्यम् अनुवादकैः करणीयम्। कार्यदायित्वप्रभृतीनां पूर्णं विवरणं पृथग्रूपेण नियुक्तिपत्रेण सह सूचयिष्यते।
  - भारतीय-भाषा-समितिः कदाचिद् इमां विज्ञप्तिं प्रत्याहर्तुमपि शक्नुयात्।
  - एतन्नियुक्तिम् उपलक्ष्य किमपि संशोधनं संयोजनं वा स्यात् चेत् तत् विश्वविद्यालयस्य वेवसाईट् - मध्ये संस्थापयिष्यते। अतः अभ्यर्थिनः सूच्यन्ते यत् ते नियतरूपेण विश्वविद्यालयस्य वेवसाईट् "slbsrsv.ac.in" इति पश्येयुः।

**कथम् आवेदनं करणीयम् -**

१. पासपोर्ट-आकारस्य चित्रेण सह आत्मवृत्तं निर्मातु यत्र स्वसम्बन्धि विवरणम्, स्वस्य शिक्षासम्बन्धिनी योग्यता, कार्यानुभवविषयकं सूचनादिकं च भवेत्। सर्वमेतत् अधिकाधिकतया पृष्ठाचतुष्टयं (4 Pages) न अतिक्रमेत्। एतादृश-आत्मवृत्तस्य एकं "स्क्यान-कापि" अथवा "पीडीएफ्" निर्मातु।

२. "QR code" अथवा प्रदत्तं "Link" अनुसृत्य आवश्यकसूचनासमेतं निर्धारितं "गूगल फार्म" पूरयतु।

३. आत्मवृत्तस्य "स्क्यान-कापि" अथवा "पीडीएफ्" "गूगल फार्म" - मध्ये "अपलोड्" क्रियताम्।

४. "पीडीएफ्" अथवा "जेपिजि" फरम्याट् "गूगल फार्म" - मध्ये "अपलोड्" क्रियताम्।

५. अन्ततः "गूगल फार्म" "सब्मिट्" कृत्वा "सब्मिशन"-सन्देशस्य एकं "स्क्रीनशाट" इति स्वीकरोतु यत् खलु भाविनि काले सूचनादिनिमित्तं भवतः उपयोगि भवेत्।

६. इदम् अवधातव्यं यत् "सब्मिशन" इत्यनन्तरं आवेदनप्रारूपे किमपि परिवर्तनं संशोधनं वा न अनुमोद्यते।

७. आवेदनस्य अन्तिमा तिथिः - जुनमासस्य १८-तमदिनस्य मध्यरात्रिः।

८. **"गूगल फार्म" इत्यस्य पूरणसमये कापि समस्या अनुभूयते चेत्** "bbs.karyakram@gmail.com" **इत्यत्र सम्पर्कः कर्तुं शक्यते।**

**आवेदननिमित्तं "गूगल फार्म" इत्यस्य QR code, Link च -**

https://forms.gle/Ds7KhmTKxQ8n9q3g8

**चयनपद्धतिः "अनलाइन" – साक्षात्कारमाध्यमेन चालयिष्यते।**

प्राथमिकतया चिताः अभ्यर्थिनः उत्तरोत्तरप्रकियानिमित्तं "ई-मेल" माध्यमेन सूचयिष्यन्ते।

सह-कुलसचिवः (विकास-विभागः)

प्रतिलिपिः प्रेषणीयः –

- भारतीय-भाषा-समितेः सर्वान् सदस्यान् प्रति
- उप-सचिवं प्रति (भाषाविभागः), शिक्षा-मन्त्रालयः, भारत-सर्वकारः, शास्त्री-भवनम्, नवदिल्ली – ११०००१
- मुख्य सतर्कता अधिकारी|
- सिस्टम एडमिनिस्ट्रेटर से निवेदन है कि वह इस विज्ञाप्ति को सभी के सूचनार्थ विश्विद्यालय की वेवसाइट पर डालने का कष्ट करें|
- OSD to VC
- निजी सचिव कुलपति , कुलसचिव वित्ताधिकारी|
- सम्बंधित पत्रावली|

मनजीत सिंह

सह-कुलसचिवः (विकास-विभागः)

for n.a. pls
Sh. Sachin
10/06/24